# Vishnuvaibhavam

# વિષ્ણુવૈભવમ્

## Document Information

```
Text title : Vishnu Vaibhavam
File name : viShNuvaibhavam.itx
Category : vishhnu
Location : doc_vishhnu
Proofread by : Suba Ramesh, NA
Latest update : January 5, 2022
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 5, 2022

*sanskritdocuments.org*

# વિષ્ણુવૈભવમ્

અથ વિષ્ણુસંહિતાયાં તૃતીયઃ પટલઃ ।
સિદ્ધઃ-
અથ વક્ષ્યામિ સઙ્ક્ષેપાદ્ વિષ્ણોર્વૈભવમુત્તમમ્ ।
યેન જ્ઞાતેન શુદ્ધાત્મા વૈષ્ણવં પદમાપ્નુયાત્ ॥ ૧॥ (જ્ઞાનેન)

દેવતેહ પરં જ્યોતિરેક એવ પરઃ પુમાન્ ।
સ એવ બહુધા લોકે માયયા ભિદ્યતે સ્વયા ॥ ૨॥

પુરુષાખ્યઃ સ્વયં માયાં પ્રકૃતિં વ્યજ્ય સ દ્વિધા ।
સ્થિતસ્ત્રિધા ચ સત્ત્વાદિગુણભેદાત્ પ્રતીયતે ॥ ૩॥ (સ્થિતં ત્રિધા)

વિષ્ણુબ્રહ્મશિવાખ્યોઽસૌ સ્થિત્યુત્પત્ત્યન્તકૃન્મતઃ । (વિષ્ણુર્બ્રહ્મ)
મૂર્તયો વાસુદેવાદ્યાઃ ધર્મજ્ઞાનાદિભેદતઃ ॥ ૪॥

ચતસ્રસ્તસ્ય વિજ્ઞેયા વેદવર્ણયુગાશ્રયાઃ ।
પરમેષ્ઠી પુમાન્ વિશ્વો નિવૃત્તિઃ સર્વ ઇત્યસૌ ॥ ૫॥

પઞ્ચધોપનિષદ્ભેદાન્મહાભૂતત્વમાગતઃ ।
મનઃશ્રોત્રાદિભિઃ ષડ્ભિરઙ્ગૈશ્ચ હૃદયાદિભિઃ ॥ ૬॥

ષડક્ષરાત્મકો નિત્યમૃતુભિશ્ચૈષ ભિદ્યતે ।
સપ્તવ્યાહૃતિભિર્લોકૈશ્છન્દોભિઃ ઋતુભિસ્તથા ॥ ૭॥

સપ્તધા ભિદ્યમાનોઽસૌ વિજ્ઞાતવ્યો વિચક્ષણૈઃ ।
અષ્ટપ્રકૃતિભિશ્ચાસાવષ્ટમૂર્તિભિરેવ ચ ॥ ૮॥

અષ્ટાક્ષરમયો નિત્યમષ્ટધા ચૈષ ભિદ્યતે ।
નારાયણો નૃસિંહશ્ચ વરાહો વામનસ્તથા ॥ ૯॥ (વારાહો)

રામબ્રહ્મેન્દ્રસૂર્યાશ્ચ ચન્દ્રસ્તૈર્નવધા સ્થિતઃ । સ્મૃતઃ)
ઇન્દ્રોઽગ્નિશ્ચ યમશ્ચૈવ નિરૃતિવરુણસ્તથા ॥ ૧૦॥

વાયુશ્ચ સોમ ઈશાનો બ્રહ્માનન્તશ્ચ તે દશ ।
એકાદશેન્દ્રિયૈર્ભિન્નસ્તથા દ્વાદશમાસપૈઃ ॥ ૧૧॥ (એકાદશેન્દ્રિયૈશ્ચૈવ તથા)

સ ત્રયોદશધા ચૈવ વિશ્વેદેવાદિભિઃ સ્મૃતઃ ।
સ ચતુર્દશધા ભિન્નો મનુભિશ્ચાક્ષુષાદિભિઃ ॥ ૧૨॥

તિથિભિશ્ચૈવ વિજ્ઞેયઃ સ પઞ્ચદશધા સ્થિતઃ ।
સ્વરૈઃ ષોડશધા ભિન્નો દિક્કોણાવાન્તરૈસ્તથા ॥ ૧૩॥

મૂર્ત્યન્તરૈશ્ચ વિજ્ઞેયો બહુધા તસ્ય વિસ્તરઃ । (મૂર્ત્યન્તરૈસ્તુ)
એકદ્વિત્રિચતુષ્પઞ્ચષડાદ્યા વિશ્વતોમુખાઃ ॥ ૧૪॥

મુખભેદાઃ સમાખ્યાતાસ્તસ્ય વિશ્વાત્મનો હરેઃ ।
હ્યાદયો વિશ્વતઃપાણેર્ભુજભેદાસ્તથા સ્મૃતાઃ ॥ ૧૫॥

વિવિધાભરણા દીર્ઘા વિવિધાયુધધારિણઃ ।
મૂર્ધાનશ્ચૈવ તસ્યોક્તા લસન્મકુટકુણ્ડલાઃ ॥ ૧૬॥ (લસન્મકરકુણ્ડલાઃ)

સહસ્રં પૌરુષે સૂક્તે પાદાશ્ચાક્ષીણ્યનેકશઃ ।
હિરણ્યગર્ભોઽનેકાત્મા વિમલઃ શ્યામ એવ ચ ॥ ૧૭॥

નીલઃ પીતશ્ચ રક્તશ્ચ નાનાવર્ણશ્ચ કીર્તિતઃ ।
ચન્દ્રાદિત્યૌ સ્મૃતૌ તસ્ય વામદક્ષિણલોચને ॥ ૧૮॥

બ્રહ્માણમાહુર્મૂર્ધાનં કેશાંશ્ચાસ્ય વનસ્પતીન્ ।
ભ્રુવોર્મધ્યં તથા રુદ્રં સોમં ચ મનસિ સ્થિતમ્ ॥ ૧૯॥

એકાદશાસ્ય વિજ્ઞેયા રુદ્રાઃ કણ્ઠં સમાશ્રિતાઃ ।
નક્ષત્રગ્રહતારાશ્ચ દશનાસ્તસ્ય કીર્તિતાઃ ॥ ૨૦॥

ધર્માધર્મૌ તથોર્ધ્વાધરોષ્ઠસમ્પુટમાશ્રિતો ।
ઇન્દ્રાગ્ની તાલુકે તસ્ય જિહ્વા ચૈવ સરસ્વતી ॥ ૨૧॥

દિશશ્ચ વિદિશશ્ચૈવ શ્રોત્રયોઃ સંવ્યવસ્થિતાઃ ।
વાયુઃ પ્રાણેષુ વિજ્ઞેયો મરુતોઽઙ્ગુલયઃ સ્મૃતાઃ ॥ ૨૨॥

ઋષયો રોમકૂપસ્થાઃ સમુદ્રા વસ્તિગોચરાઃ ।
નદ્યશ્ચ વસુધા ચાસ્ય નાગાશ્ચ નલકે સ્થિતાઃ ॥ ૨૩॥

૧। 'સ્તુ', ૨। 'કરકુ' ખ। ગ। પાઠઃ।

જાનુસ્થાવશ્વિનૌ દેવૌ પર્વતાશ્ચોરુસંશ્રિતાઃ ।
ગુહ્યેઽસ્ય ગુહ્યકા જ્ઞેયા વસવશ્ચોરસિ સ્થિતાઃ ॥ ૨૪॥ (વસવશ્ચોરુસંસ્થિતાઃ, વસવશ્ચોરરસ્થિતાઃ)

નખાગ્રેષુ ચ વિજ્ઞેયા દિવ્યા ઓષધયઃ સ્થિતાઃ ।
નાસિકાયાઃ પુટૌ જ્ઞેયાવયને દક્ષિણોત્તરે ॥ ૨૫॥

ઋતવો બાહુમૂલસ્થા માસાસ્તસ્ય કરેષુ ચ ।
લલાટાગ્રે સ્થિતાઃ સિદ્ધા ભ્રુવોર્મેઘાઃ સવિદ્યુતઃ ॥ ૨૬॥

યક્ષકિન્નરગન્ધર્વા દૈતેયા દાનવાસ્તથા ।
રાક્ષસાશ્ચારણાશ્ચાસ્ય જઠરં તુ સમાશ્રિતાઃ ॥ ૨૭॥ (જઠરં ચ)

પિતરઃ પ્રેતકૂશ્માણ્ડવેતાલપ્રમથાસ્તથા । (વેતાલાઃ પ્રમથાસ્તથા)
પાતાલગોચરાશ્ચાસ્ય પાદયુગ્મે વ્યવસ્થિતાઃ ॥ ૨૮॥

પાર્શ્વયોસ્તસ્ય વિજ્ઞેયા યજ્ઞા વૈદિકતાન્ત્રિકાઃ ।
અગ્નિહોત્રાદિકર્માણિ વર્ણાશ્રમગતાનિ ચ ॥ ૨૯॥

સ્વાહાસ્વધાવષટ્કારાઃ સર્વેઽસ્ય હૃદયે સ્થિતાઃ ।
યે વૈ સહસ્રનામાનો વિષ્ણવઃ પરિકીર્તિતાઃ ॥ ૩૦॥

સહસ્રમૂર્તયસ્તેઽત્ર યથાયોગમવસ્થિતાઃ ।
યતઃ સહસ્રસઙ્ખ્યાપિ બહુસઙ્ખ્યા પ્રકીર્તિતા ॥ ૩૧॥

મૂર્તયશ્ચાસ્ય સર્વાસ્તાઃ સઙ્ખ્યાતીતા હ્યનેકશઃ ।
દેવાદીનાં ચ સર્વેષાં મૂર્તયોઽત્રૈવ કીર્તિતાઃ ॥ ૩૨॥

તસ્માત્ સહસ્રમૂર્તિઃ સન્ વિષ્ણુઃ સર્વાત્મકો મતઃ । (સં વિષ્ણુઃ)
દર્પણાનાં બહુત્વે તુ દૃશ્યતે નૈકતા યથા ॥ ૩૩॥

તદ્વદ્ બહુત્વં મન્યન્તે વિષ્ણોસ્તસ્યાલ્પચેતસઃ ।
યથામ્ભસીન્દુબિમ્બાનિ પ્રતિશબ્દાશ્ચ નૈકધા ॥ ૩૪॥

એકોઽપ્યાત્મા બહુષ્વેવમિત્યાહુસ્તત્ત્વદર્શિનઃ ।
પરમાર્થમજાનન્તો મૂઢાસ્ત્વજ્ઞાનમોહિતાઃ ॥ ૩૫॥

ક્ષેત્રજ્ઞસ્ય બહુત્વં હિ વદન્તીહ રમન્તિ ચ ।
બ્રાહ્મણા યસ્ય મુખતઃ ક્ષત્રિયા યસ્ય બાહુતઃ ॥ ૩૬॥

વૈશ્યા યસ્યોરુતો જાતાસ્તદ્વિષ્ણોઃ પરમં પદમ્ ।
ઈદૃશં તં મહાવિષ્ણુમપ્રમેયમનામયમ્ ॥ ૩૭॥

તત્પ્રસાદાદૃતે વક્તું જ્ઞાતું વા નૈવ શક્યતે ।
સર્વદેવાશ્રયો વિષ્ણુઃ સર્વે દેવાસ્તદાત્મકાઃ ॥ ૩૮॥

અશેષં વાઙ્મયં ચેદં લોકાલોકં ચરાચરમ્ ।
વ્યાપ્તં વિષ્ણુશરીરેણ વાયુનેવામ્બરં સદા ॥ ૩૯॥

સર્વે વિષ્ણુપરા દેવાઃ સર્વશાસ્ત્રેષુ કીર્તિતાઃ ।
યતો જાતાખિલા સૃષ્ટિરન્તે તલ્લયભાગિની ॥ ૪૦॥

તતોઽન્યઃ પુણ્ડરીકાક્ષાત્ કો વિશ્વં વ્યાપ્ય તિષ્ઠતિ ।
આધારાધેયભાવેન દ્વિધાવસ્થો જનાર્દનઃ ॥ ૪૧॥

સર્વભૂતહિતાયાસૌં સ્થિતઃ સકલનિષ્કલઃ ।
એવં ચોભયરૂપોઽસૌ જ્ઞેયો વિષ્ણુઃ પરાત્પરઃ ॥ ૪૨॥ (પરાવરઃ)

સ્થૂલસૂક્ષ્મપરત્વેન ત્રિધા ચ ભગવાન્ સ્થિતઃ ।
પ્રભવિષ્ણુર્મહાવિષ્ણુઃ સદાવિષ્ણુશ્ચ સ સ્મૃતઃ ॥ ૪૩॥

સ હ્યાત્મા ચાન્તરાત્મા ચ પરમાત્મા ચ સ સ્મૃતઃ । (ચ કીર્તિતઃ)
વૈરાજં લૈઙ્ગિકં ચૈશં બહિરન્તશ્ચ સર્વશઃ ॥ ૪૪॥

શબ્દાદિશ્ચિન્મયં રૂપં જાગ્રત્સ્વપ્નસુષુપ્તિગમ્ । (શબ્દાર્થશ્ચિન્મયં)
મન્ત્રાનુસ્વારનાદેષુ ત્રયમન્વેષયેદ્ બુધઃ ॥ ૪૫॥

વેદે સાઙ્ખયે ચ યોગે ચ પઞ્ચરાત્રે ચ કેવલે । (કેવલમ્)
ધર્મશાસ્ત્રે પુરાણે ચ મુનિભિર્દેવમાનુષૈઃ ॥ ૪૬॥

પઠ્યતે નિખિલૈર્નિત્યં વિશ્વં વિષ્ણુમયં જગત્ ।
અતીતાનાગતં ચૈવ વર્તમાનં ચ કિઞ્ચન ॥ ૪૭॥

ઇન્દ્રિયાણીન્દ્રિયાર્થાશ્ચ ભૂતાન્તઃકરણાનિ ચ ।
અવ્યક્તં ત્રિગુણા માયા વિદ્યા ધર્માદયસ્તથા ॥ ૪૮॥

નિયતિશ્ચ કલા કાલઃ સર્વમન્યચ્ચ તન્મયમ્ ।
વિષ્ણુરેવ પરો દેવઃ સર્વભૂતેષ્વવસ્થિતઃ ॥ ૪૯॥

સર્વભૂતાનિ ચૈવાસૌ ન તદસ્તીહ યન્ન સઃ ।
દેવાસુરાદયો મર્ત્યાઃ પશવશ્ચ સરીસૃપાઃ ॥ ૫૦॥

તરુવલ્લીતૃણૌષધ્યો મહાભ્રાશનિવિદ્યુતઃ ।

શૈલાબ્ધિસરિદારામનગરાણિ સરાંસિ ચ ॥ ૫૧॥

લોકાશ્ચાનન્તકાલાગ્નિપ્રેતાવાસોરગાલયાઃ ।
સપ્ત ભૂરાદયો બ્રાહ્મશૈવવૈષ્ણવસંજ્ઞિતાઃ ॥ ૫૨॥

સર્વે ચ વિષ્ણુનૈકેન વ્યાપ્તા ઇત્યવધારય ।
વરાહો ભાર્ગવઃ સિંહો રામશ્રીધરવામનાઃ ॥ ૫૩॥

અશ્વકૃષ્ણૌ ચ દિક્ષ્વેષાં લોકૈરણ્ડં સહાખિલમ્ ।
યચ્ચાનુક્તમશેષેણ વિષ્ણોરેતા વિભૂતયઃ ॥ ૫૪॥

વિશ્વવ્યાપિતયૈવૈષ વિષ્ણુત્વં પ્રાપ્તવાન્ પ્રભુઃ ।
(વિશ્વવ્યાપ્તિતયૈવૈષ વિષ્ણુત્વં પ્રાપ્તવાન્ વિભુઃ)
વસનાત્ સર્વભૂતેષુ વાસુદેવત્વમેવ ચ ॥ ૫૫॥

આદિમૂર્તેઃ સમાકૃષ્ટ ઇતિ સઙ્કર્ષણઃ સ્મૃતઃ ।
પ્રદ્યુમ્નો દ્યુમ્નપુષ્ટત્વાદનિરુદ્ધોઽનિરોધનાત્ ॥ ૫૬॥

અચ્યુતોઽચ્યવનાદ્ યોગાત્ ત્રિધામા ધામભિસ્ત્રિભિઃ ।
વિલોમેન્દ્રિયગમ્યત્વાજ્જ્ઞેયોઽન્તર્યામ્યધોક્ષજઃ ॥ ૫૭
વૈકુણ્ઠામલવર્ણત્વાદ્ વૈકુણ્ઠશ્ચાયમુચ્યતે । (વેકુણ્ઠામલવર્ણત્વાદ્)
કેશૌ સર્ગાન્તયોરસ્ય સ્ત ઇત્યેવૈષ કેશવઃ ॥ ૫૮॥

નરનારીપ્રકર્તૃત્વાન્નરાણાં ચાયનાદયમ્ ।
નારાયણો નરોત્થાનામયનત્વાદપાં ચ સઃ ॥ ૫૯॥

માધવો મધુષૂત્પત્ત્યા ધવત્વાદ્ વા શ્રિયઃ સ્મૃતઃ ।
ગાં વિન્દતીતિ ગોવિન્દો દુઃખાનાં હરણાદ્ધરિઃ ॥ ૬૦॥

મધ્વાખ્યાસુરઘાતિત્વાદુચ્યતે મધુસૂદનઃ ।
ત્રિભિઃ સ્વૈર્વિક્રમૈર્વ્યાપ્ત ઇતિ જ્ઞેયસ્ત્રિવિક્રમઃ ॥ ૬૧॥

વામનો હ્રસ્વતાયોગાચ્છ્રીધરો વહનાચ્છ્રિયઃ ।
હૃષીકાખ્યેન્દ્રિયેશત્વાદ્ધૃષીકેશોઽયમીરિતઃ ॥ ૬૨॥

પદ્મં નાભેરભૂદ્ યસ્ય પદ્મનાભસ્તતઃ સ્મૃતઃ ।
ઉદરાલમ્બિ દામાસ્યેત્યુક્તો દામોદરશ્ચ સઃ ॥ ૬૩॥

સ રુદ્રો રોદનાજ્જાતો બ્રહ્મા બૃંહણકર્મણા ।
ઇન્દ્રશ્ચ પરમૈશ્વર્યાદ્ વહનાદ્ વહ્નિરુચ્યતે ॥ ૬૪॥

યમઃ સંયમનાત્ પુંસાં વરણાદ્ વરુણસ્તથા ।
વાયુર્વાનાત સવાત સોમ ઈશશ્ચેષ્ટો જનેષ્વતઃ ॥ ૬૫॥

આદિત્યોઽદિતિપુત્રત્વાચ્ચન્દ્રશ્ચન્દયતીતિ સઃ ।
ઇત્યેવં ગુણવૃત્ત્યાદ્યૈઃ શબ્દૈરેકોઽપ્યનેકધા ॥ ૬૬॥

પ્રતીયતેઽમ્ભસીવેન્દુર્બહુત્વં નાસ્ય તાવતા ।
યથા સર્વગતો વાયુરતિસૂક્ષ્મો ન દૃશ્યતે ॥ ૬૭॥

તથા સર્વગતો વિષ્ણુરજ્ઞૈસ્તજ્ઞૈસ્તુ દૃશ્યતે ।
ઇચ્છાજ્ઞાનક્રિયાભેદાન તિસ્રો વૈ તસ્ય શક્તયઃ ॥ ૬૮॥

યાભિર્દ્વાદશધા ભિન્નાશ્ચતસ્રસ્તસ્ય મૂર્તયઃ ।
સા તુ શક્તિઃ પરા સૂક્ષ્મા યેચ્છાખ્યા કામરૂપિણી ॥ ૬૯॥

ઓતં પ્રોતં યયા સર્વં દૃશ્યતે સચરાચરમ્ ।
દ્વિધા વિભજ્ય સાત્માનં ક્રિયાજ્ઞાનપ્રવર્તનમ્ ॥ ૭૦॥

પ્રકરોતિ જગત્ કૃત્સ્નં સ્વતન્ત્રમિવ તદ્વશાત્ ।
ક્રિયાશક્ત્યાપરો વિષ્ણુઃ જ્ઞાનશક્ત્યા ખગેશ્વરઃ ॥ ૭૧॥

તં યજ્ઞપુરુષં પ્રાહુસ્તપશ્છન્દોમયં ખગમ્ ।
ઇચ્છાશક્ત્યા તુ વિજ્ઞેયઃ પુરુષો યઃ પરોઽવ્યયઃ ॥ ૭૨॥

જ્ઞાનપૂર્વં પ્રવર્તેત ક્રિયા કર્તા તતઃ પુનઃ ।
જ્ઞાનાધારા ક્રિયા જ્ઞેયા ન ચૈકા સમ્પ્રવર્તતે ॥ ૭૩॥

ક્રિયાજ્ઞાનપ્રભેદેન શક્તિરેકા પરસ્ય નુઃ ।
દ્વિધા વ્યાપ્ય જગત્ કૃત્સ્નં ચરાચરમવસ્થિતા ॥ ૭૪॥

શક્તિશક્તિમતોર્યસ્માન્ન ભેદોઽસ્તિ પરસ્પરમ્ ।
અભિન્નં તેન બોદ્ધવ્યં ક્રિયાજ્ઞાનદ્વયં બુધૈઃ ॥ ૭૫॥

એક એવ ત્રિધારૂપો ભેદેનાનેન સંસ્થિતઃ ।
ક્રિયા જ્ઞાનં તથેચ્છા ચ ત્રિતયં ચૈકમેવ હિ ॥ ૭૬॥

ઉપચારઃ સ્મૃતો ભેદ એકસ્યૈવ મહાત્મનઃ ।
ખગોપેન્દ્રશિવાશ્ચૈવમભિન્નાસ્તેન કીર્તિતાઃ ॥ ૭૭॥

ઇન્દ્રિયાણીન્દ્રિયાર્થાશ્ચ બુદ્ધેરેવ વિભૂતયઃ ।
અહઙ્કારવિકારાશ્ચ જલબુદ્બુદવન્મતાઃ ॥ ૭૮॥

ગોષ્વપ્યનેકવર્ણાસુ યથા ક્ષૌરકવર્ણતા ।
તથાશ્રયેષુ ભિન્નેષ્વપ્યેકરૂપમવેક્ષ્યતામ ॥ ૭૯॥

ક્ષણભઙ્ગિ જગત્ સર્વં વિદ્ધ્યેતત્ સચરાચરમ્ ।
તદભઙ્ગ્યેકમેવેહ યદ્ વિષ્ણોઃ પરમં પદમ્ ॥ ૮૦॥

તસ્યેશ્વરસ્ય ચૈશ્વર્યાત્ સર્વમેતત્ પ્રવર્તતે ।
સેશ્વરં હિ જગત્ કૃત્સ્નં નાનીશ્વરમિદં ભવત્ ॥ ૮૧॥

ક્ષેત્રજ્ઞસ્ય બહુત્વં ચ વદન્ત્યજ્ઞાનમોહિતાઃ ।
ન ક્ષેત્રજ્ઞબહુત્વં તુ તત્ત્વજ્ઞાનાં તુ સમ્મતમ્ ॥ ૮૨॥

ઉપાધિભેદાદ્ યે ત્વાહુર્બહુત્વં પરમાત્મનઃ ।
સંસરન્ત્યેવ તે મૂઢા નાપ્નુવન્તિ પરં પદમ ॥ ૮૩॥

યેષાં વિશ્વસૃજોઽપ્યસ્ય સર્વજ્ઞત્વમનીપ્સિતમ ।
તૈઃ પ્રમાણપ્રમેયાનાં સમ્બન્ધો નોઽવધારિતઃ ॥ ૮૪॥

સંસ્થાનિનાં સમુત્પત્ત્યા જગતો જન્મ યન્મતમ્ ।
તદીશકૃતમન્યોઽલં પ્રકૃતેર્ન હિ ચોદને ॥ ૮૫॥

તસ્માદીશકૃતં વિશ્વં તદૂઢં તન્મયં તથા ।
તત્પાલિતં તદર્થં ચ તદીયં ચેતિ ગૃહ્યતામ્ ॥ ૮૬॥

તસ્યેદૃશસ્ય દેવસ્ય પ્રભાવો નન્વદુર્ગમઃ ।
સ્વયમેવ સ તં વેદ યદિ વા ન તથા શ્રુતેઃ ॥ ૮૭॥

યતો જાતાખિલા સૃષ્ટિરિયં કો વેદ તત્ પરમ્ ।
અર્વાગ્દેવા હિ તત્સૃષ્ટા બ્રહ્માદ્યા અપિ મૂર્તયઃ ॥ ૮૮॥

તથાપિ મહિમોદ્દેશસ્તસ્યોક્તોઽચિન્ત્યરૂપિણઃ ।
વક્તિ યન્મહિમાનન્ત્યં ન તે વિષ્ણવિતિ શ્રુતિઃ ॥ ૮૯॥

ઇતિ વિષ્ણુસંહિતાયાં વિષ્ણુવૈભવં નામ તૃતીયઃ પટલઃ ॥

Proofread by Suba Ramesh, NA

*Vishnuvaibhavam*

pdf was typeset on January 5, 2022

Please send corrections to *sanskrit@cheerful.com*